प्रवेश सं० १५८ विषय: धर्म शास्त्र क्रम सं०

नाम आशौच निर्णय: ग्रन्थकार

पत्र सं० १

श्लोक सं० अक्षर सं० (पंक्तौ) ४० पंक्ति सं० (पृष्ठे) १२

आकार: ९.५ x ३.९ लिपि: दे.ना. आधार: का.

वि० विवरणम् पू. 13923 ग.१६०१

पी० एस० यू० पी०—७७ एम० सी० डी०—१६५१—५० ०००

Indira Gandhi National Centre for the Arts

॥श्री॥ गणेशाय नमः॥ बनशंकर्यै नमः॥ आचतुर्थाद्भवेत्स्रावः पातः पंचमषष्ठयोः॥ अत ऊर्ध्वं प्रसूतिः स्यादिति॥
तत्र स्रावे आद्यमासत्रये मातुः त्रिरात्रिमेवाशौचं॥ तदुपरि आषष्ठमाससमसंख्यादिनामाशौचं॥ चतुर्थे चत्वारि॥
पंचमे पंच॥ षष्ठे षडित्यर्थः॥ सपिंडानां तु स्नानमात्रेण शुद्धिः॥ स्रावे पाते तु त्रिरात्रं॥ सप्तममासप्रभृति तु स्वजात्युक्तं दशा
हादि॥ सपिंडानां मातुश्च॥ माधवस्तु॥ सूतकव्यतिरिक्तानां सप्तमे सप्तरात्रं॥ अष्टमे अष्टरात्रं॥ नवमप्रभृति तु दश
रात्रमित्याह॥ जन्माशौचमध्ये शिशुमरणे मृताशौचं नास्त्येव॥ जननिमित्तकमेवाशौचं निष्प्राणनिर्गमनेप्येवं॥
नालच्छेदनात्पूर्वं शिशुमरणे सपिंडानां त्रिरात्रिमेव सूतकं॥ नालच्छेदनानंतरं मरणे तु संपूर्णं॥ दशाहादुपरि
नामकरणात्पूर्वं शिशुमरणे निखननमेव॥ नाग्न्युदकदानं॥ ज्ञातीनां सचैलस्नानात्सद्यः शुद्धिः॥ नामकरणा
नंतरं दंतजननात्पूर्वं मरणे तु दाहखननयोर्विकल्पः॥ तत्र दहने ज्ञातीनामेकाहं॥ अनुगमनं तु कृताकृतं॥
खननपक्षे सद्यः शुद्धिः॥ दंतजननादूर्ध्वमपि त्रिवर्षपर्यंतं अकृतचूडस्य खननदहनयोर्वि[illegible]एव॥
खनने एकाहमाशौचं॥ दहने त्रिरात्रं॥ अत्र जननाद्द्विवर्षांतमनुगमनं कृताकृतं॥ पश्चान्नित्यं॥ कृतचूडस्य तु त्रिव
र्षात्पूर्वमपि तु दहनमेव दहने तु ... त्रिरात्राशौचं च नियतमेव॥ त्रिवर्षादूर्ध्वं तु यावदुपनयनं कृतचौ
लस्य वा अनुगमनं॥ दहनं॥ त्रिरात्राशौचं च नियतमेव॥ ... पित्रोस्त्वनुपनीतशिशुमरणे हेदेनखनवो

३॥ रविशोषणेत्रिरात्रं॥स्त्र्यपत्यमरणेतुविशेषः॥त्रिवर्षपर्यंतंज्ञातीनांआचौलात्सद्यःशुद्धिः॥ ॥ततोवाग्दाना
दर्वाक्‌एकाहमाशौचं॥ततोविवाहादर्वाक्पतिपक्षेचपितृपक्षेचत्र्यहः॥पित्रोस्तुअजातदंतासुकन्यासुएकाहः
ततस्त्र्यहं॥संस्कृतास्वपिपितृगेहमृतासुपित्रोस्त्र्यहमितिमाधवः॥अन्येतुगृहांतरेमरणेपित्र्यमाहुः॥पितृ
व्यादीनांत्वेकाहमेव॥पितृगेहेकन्यायाःप्रसवेत्वेकाहः॥माधवस्तुपित्रोर्गृहेकन्यायाःप्रसवमरणयोःपित्रो
स्त्रिरात्रमेव॥पितृव्यादीनांत्वेकरात्रमित्याह॥सपिंडजननेउपनीतसपिंडमरणेचब्राह्मणस्यदशाहं॥क्ष
त्रियस्यद्वादशाहं॥वैश्यस्यपंचदशरात्रं॥शूद्रस्यमासं॥सच्छूद्रस्यपक्षं॥कूटस्थमारभ्यसप्तपुरुषाःसपिंडाः॥
ततःसप्तसमानोदकाः॥तदुत्तरंगोत्रजाएव॥तत्रसमानोदकेउत्पन्नेउपनीतमृतेचत्रिरात्रं॥गोत्रजेतुस्ना
स्तु नाच्छुद्धिः॥तत्रप्रसूत्याशौचंदशाहादूर्ध्वपरिजननज्ञानेनास्त्येव॥तत्रापिपितुःस्नानमेव॥मृताशौचेतुद
शाहोपरिमासत्रयात्पूर्वंमरणज्ञानेत्रिरात्रं॥तत्रआषष्ठंपक्षिणी॥तत्रआनवममहः॥ततःस्नानोदक
दानाभ्यांशुद्धिः॥आवर्षं॥ ॥वर्षादूर्ध्वंतुआस्नानमात्रं॥इदंचसर्वंविज्ञानेश्वराद्यनुरोधेनोक्तं॥माधवमते
तुत्रिपक्षादर्वाक्‌त्र्यहं॥ततःषण्मासंपक्षिणी॥ततःआवर्षादहोरात्रं॥ततऊर्ध्वंस्नानोदकदानेइतिबोधः॥

Indira Gandhi National
Centre for the Arts